# Shri Sarveshvara Prapatti Stotram

# શ્રીસર્વેશ્વરપ્રપત્તિસ્તોત્રમ્

## Document Information

Text title : Shri Sarveshvara Prapatti Stotram

File name : sarveshvaraprapattistotram.itx

Category : vishhnu, nimbArkAchArya, krishna, prapatti

Location : doc_vishhnu

Author : shrIjI

Proofread by : Mohan Chettoor

Latest update : January 7, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 7, 2023

*sanskritdocuments.org*

# શ્રીસર્વેશ્વરપ્રપત્તિસ્તોત્રમ્

કૃષ્ણં સર્વેશ્વરં દેવમસ્માકં કુલદૈવતમ્ ।
મનસા શિરસા વાચા પ્રણમામિ મુહુર્મુહુઃ ॥ ૧॥

કારુણ્યસિન્ધું સ્વજનૈકબન્ધું
　કૈશોરવેષં કમનીયકેશમ્ ।
કાલિન્દિકૂલે કૃતરાસગોષ્ઠિં
　સર્વેશ્વરં તં શરણં પ્રપદ્યે ॥ ૨॥

વેદૈકગમ્યં ભુવનૈકરમ્યં
　વિશ્વસ્ય જન્મસ્થિતિભઙ્ગહેતુમ્ ।
સર્વાધિવાસં ન પરપ્રકાશં
　સર્વેશ્વરં તં શરણં પ્રપદ્યે ॥ ૩॥

રાધાકલત્રં મનસાપરત્રં
　હેયાસ્પૃશં દિવ્યગુણૈકભૂમિં
પદ્માકરાલાલિતપાદપદ્મં
　સર્વેશ્વરં તં શરણં પ્રપદ્યે ॥ ૪॥

આભીરદારાનયનાબ્જકોષૈઃ
　સંવર્ચિતાસ્યં નિખિલૈરુપાસ્યમ્ ।
ગોગોપગોપીભિરલઙ્કૃતાઙ્ઘ્રિ
　સર્વેશ્વરં તં શરણં પ્રપદ્યે ॥ ૫॥

ગોપાલબાલં સુરરાજપાલં
　રામાઙ્કમાલં શતપત્રમાલમ્ ।
વાદ્યરસાલં વિરજં વિશાલં
　સર્વેશ્વરં તં શરણં પ્રપદ્યે ॥ ૬॥

આનન્દસારં હૃતભૂમિભારં

કંશાન્તકારં હ્યપિનિર્વિકારં
કન્દર્પદર્પાપહરાવતારં
સર્વેશ્વરં તં શરણં પ્રપદ્યે ॥ ૭॥

વિશ્વાત્મકં વિશ્વજનાભિરામં
બ્રહ્મેન્દ્રરુદ્રૈર્મનસા દુરાપમ્ ।
ભિન્નં હ્યભિન્નં જગતોહિ યસ્માત્
સર્વેશ્વરં તં શરણં પ્રપદ્યે ॥ ૮॥

પીતાંશુકં ચારુવિચિત્રવેશં
સ્નિગ્ધાલકં કઞ્જવિશાલનેત્રમ્ ।
ગોરોચનાલં કૃતભાલનેત્રં
સર્વેશ્વરં તં શરણં પ્રપદ્યે ॥ ૯॥

વન્યૈવિચિત્રૈઃકૃતમૌલિભૂષણં
મુક્તાફલાઢ્યં ઝષરાજકુણ્ડલમ્ ।
હેમાઙ્ગદં હારકિરીટકૌસ્તુભં
મેઘાભમાનન્દમયં મનોહરમ્ ॥ ૧૦॥

સર્વેશ્વરં સકલલોકલલામમાદ્યં
દેવં વરેણ્યમનિશં સ્વગતૈર્દુ રાપમ્ ।
વૃન્દાવનાન્તર્ગતૈર્મૃગપક્ષિભૃઙ્ગૈ-
રીક્ષાપથાગતમહં શરણં પ્રપદ્યે ॥ ૧૧॥

હે સર્વજ્ઞ ! ઋતજ્ઞ ! સર્વશરણ ! સ્વાનન્યરક્ષાપર !
કારુણ્યાકર ! વીર! આદિપુરુષ ! શ્રીકૃષ્ણ ! ગોપીપતે ! ।
આર્તત્રાણ ! કૃતજ્ઞ ! ગોકુલપતે ! નાગેન્દ્રપાશાન્તક !
દીનોદ્ધારક ! પ્રાણનાથ ! પતિતં માં પાહિ સર્વેશ્વર ! ॥ ૧૨॥

હે નારાયણ ! નારસિંહ ! નર ! હે લીલાપતે ! ભૂપતે !
પૂરર્ણાચિન્ત્યવિચિત્રશક્તિક વિભો ! શ્રીશ! ક્ષમાસાગર ! ।
આનન્દામૃતવારિધે ! વરદ ! હે વાત્સલ્યરત્નાકર !
ત્વામાશ્રિત્ય ન કોઽપિ યાતિ જઠરં તન્માં ભવાત્તારય ॥ ૧૩॥

માતા પિતા ગુરુરપીશ ! હિતોપદેષ્ટા
વિદ્યાધનં સ્વજનવન્ધુરસુપ્રિયો મે ।
ધાતા સખા પતિરશેષગતિસ્ત્વમેવ

નાન્યં સ્મરામિ તવપાદસરોરુહાદ્વૈ ॥ ૧૪॥

અહો દયાલો ! સ્વદયાવશેન વૈ
પ્રપશ્ય માં પ્રાપય પાદસેવને ।
યયા પુનર્મે વિષયેષુ માધવ !
રતિર્ન ભૂયાદ્ધિ તથૈવ સાધય ॥ ૧૫॥

શ્રીમત્સર્વેશ્વરસ્યૈતત્સ્તોત્રં પાપપ્રણાશનમ્ ।
એતેન તુષ્યતાં શ્રીમદ્રાધિકાપ્રાણવલ્લભઃ ॥ ૧૬॥

ઇતિ શ્રીમન્નિમ્બાર્કપાદપીઠાધિરૂઢશ્રી નિમ્બાર્કશરણદેવાચાર્યવિરચિતા
શ્રીસર્વેશ્વરપ્રપત્તિસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Mohan Chettoor

---

*Shri Sarveshvara Prapatti Stotram*

pdf was typeset on January 7, 2023

Please send corrections to *sanskrit@cheerful.com*